# Shri Dandayudhapani Ashtakam

# શ્રીદણ્ડાયુધપાણ્યષ્ટકમ્

## Document Information

Text title : DandayudhapAni Ashtakam

File name : daNDAyudhapANyaShTakam.itx

Category : subrahmanya, aShTaka

Location : doc_subrahmanya

Proofread by : Sreenivasa Rao Bhagavatula

Description-comments : From stotrArNavaH 07-06

Latest update : February 11, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શ્રીદણ્ડાયુધપાણ્યષ્ટકમ્

યઃ પૂર્વં શિવશક્તિનામકગિરિદ્વન્દ્વે હિડિમ્બાસુરે-
ણાનીતે ફલિનીસ્થલાન્તરગતે કૌમારવેષોજ્જ્વલઃ ।
આવિર્ભૂય ઘટોદ્ભવાય મુનયે ભૂયો વરાન્ પ્રાદિશત્
શ્રીદણ્ડાયુધપાણિરાત્તકરુણઃ પાયાદપાયાત્સ મામ્ ॥ ૧॥

શ્રીમત્પુષ્યરથોત્સવેઽન્નમધુદુગ્ધાદ્યૈઃ પદાર્થોત્તમૈઃ
નાનાદેશસમાગતૈરગણિતૈર્યઃ કાવડીસમ્ભૃતૈઃ ।
ભક્તૌઘૈરભિષેચિતો બહુવરાંસ્તેભ્યો દદાત્યાદરાત્
શ્રીદણ્ડાયુધપાણિરાત્તકરુણઃ પાયાદપાયત્સ મામ્ ॥ ૨॥

નાનાદિગ્ભ્ય ઉપાગતા નિજમહાવેશાન્વિતાઃ સુન્દરીઃ
તાસામેત્ય નિશાસુ યઃ સુમશરાનન્દાનુભૂતિચ્છલાત્ ।
ગોપીનાં યદુનાથવન્નિજપરાનન્દં તનોતિ સ્ફુટં
શ્રીદણ્ડાયુધપાણિરાત્તકરુણઃ પાયાદપાયાત્સ મામ્ ॥ ૩॥

દુષ્ટાનામિહ ભૂતભાવિભવતાં દુર્માર્ગસઞ્ચારિણાં
કષ્ટાહઙ્કૃતિજન્યકિલ્બિષવશાચ્છિષ્ટપ્રવિધ્વંસિનામ્ ।
શિક્ષાર્થં નિજપાણિનોદ્વહતિ યો દણ્ડાભિધાનાયુધં
શ્રીદણ્ડાયુધપાણિરાત્તકરુણઃ પાયાદપાયાત્સ મામ્ ॥ ૪॥

પૂર્વં તારકસંજ્ઞક દિતિસુતં યઃ શૂરપદ્માસુરં
સિંહાસ્યં ચ નિહત્ય વાસવમુખાન્ દેવાન્ જુગોપાખિલાન્ ।
શ્રીવલ્લ્યા સહિતશ્ચ નિસ્તુલયશાઃ શ્રીદેવસેન્યા યુતઃ
શ્રીદણ્ડાયુધપાણિરાત્તકરુણઃ પાયાદપાયાત્સ મામ્ ॥ ૫॥

યસ્યાઙ્ગસ્થિતરોમકૂપનિકરે બ્રહ્માણ્ડકોટિચ્છટાઃ
સૌધાગ્રસ્થગવાક્ષરન્ધ્રવિચરત્પીલૂપમા એવ તાઃ ।
લક્ષ્યન્તે યમિદૃગ્ભિરાત્મનિ તથાભૂતસ્વવિશ્વાકૃતિઃ
શ્રીદણ્ડાયુધપાણિરાત્તકરુણઃ પાયાદપાયાત્સ મામ્ ॥ ૬॥

સદ્યોજાતમુખૈશ્ચ પઞ્ચવદનૈઃ શમ્ભોઃ સહૈકં મુખં
    પાર્વત્યા મિલિતં વિભાતિ સતતં યદ્વક્ત્રષટ્કાત્મના ।
તત્તાદૃક્ ચ્છિવશક્ત્યભેદવિષયવ્યક્ત્યુજ્જ્વલાઙ્ગં વહન્
    શ્રીદણ્ડાયુધપાણિરાત્તકરુણઃ પાયાદપાયાત્સ મામ્ ॥ ૭॥

સત્યં જ્ઞાનમનન્તમદ્વયમિતિ શ્રુત્યન્તવાક્યોદિતં
    યદ્ બ્રહ્માસ્તિ તદેવ યસ્ય ચ વિભોર્મૂર્તેઃ  સ્વરૂપં વિદુઃ ।
યોગીન્દ્રા વિમલાશયા હૃદિ નિજાનન્દાનુભૂત્યુન્નતાઃ
    શ્રીદણ્ડાયુધપાણિરાત્તકરુણઃ પાયાદપાયાત્સ મામ્ ॥ ૮॥

ઇદં શ્રીફલિનીદણ્ડાયુધપાણ્યષ્ટકસ્તવમ્ ।
પઠતામાશુ સિધ્યન્તિ નિખિલાશ્ચ મનોરથાઃ ॥ ૯॥

॥ ઇતિ શ્રીદણ્ડાયુધપાણ્યષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by Sreenivasa Rao Bhagavatula

*Shri Dandayudhapani Ashtakam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*